श्री काळिकोपनिषत्

श्री काळिकोपनिषत्

अथ हैनं ब्रह्मरंध्रे ब्रह्मस्वरूपिणीमाप्नोति | सुभगां त्रिगुणितां मुक्तासुभगां कामरेफेंदिरां समस्तरूपिणीमेतानि त्रिगुणितानि तदनु कूर्चबीजं व्योमषष्ठस्वरां बिंदुमेलनरूपां तद्द्वयं मायाद्वयं दक्षिणे काळिके चेत्यभिमुखगतां तदनु बीजसप्तकमुच्चार्य बृहद्भानुजायामुच्चरेत् | स तु शिवमयो भवेत् | सर्वसिद्धीश्वरो भवेत् | गतिस्तस्यास्तीति | नान्यस्य गतिरस्ताति | स तु वागीश्वरः | स तु नारीश्वरः | स तु देवेश्वरः | स तु सर्वेश्वरः | अभिनवजलदसंकाशा घनस्तनी कुटिलदंष्ट्रा शवासना काळिका ध्येया | त्रिकोणं पंचकोणं नवकोणं पद्मं | तस्मिन् देवी सर्वांगेऽभ्यर्च्य तदिदं सर्वांगं ॐ काळी कपालिनी कुल्ला कुरुकुल्ला विरोधिनी विप्रचित्ता उग्रा उग्रप्रभा दीप्ता नीला घना बलाका मात्रा मुद्राऽमिता चैव पंचदशकोणगाः | ब्राह्मी नारायणी माहेश्वरी कौमारी अपराजिता वाराही नारसिंहिका चेत्यष्टपत्रगाः | षोडशस्वरभेदेन प्रथमेन मंत्रविभागः | तन्मूलेनावाहनं तेनैव पूजनं | य एवं मंत्रराजं नियमेन वा लक्षमावर्तयति स पाप्मानं हंति | स ब्रह्मत्वं भजति | सः अमृतत्वं भजति | स आयुरारोग्यमैश्वर्यं भजति | सदा पंचमकारेण पूजयेत् | सदा गुरुभक्तो भवेत् | सदा देवभक्तो भवेत् | धर्मिष्ठतां पुष्टिमहतवाचं विप्रा लभंते | मंत्रजापिनो ह्यात्मा विद्याप्रपूरितो भवति | स जीवन्मुक्तो भवति | स सर्वशास्त्रं जानाति | स सर्वपुण्यकारी भवति | स सर्वयज्ञयाजी भवति | राजानो दासतां यांति | जप्त्वा स सर्वमेतं मंत्रराजं स्वयं शिव एवाहमित्यणिमादिविभूतीनामीश्वरः काळिकां लभेत् | |

आवयोः पात्रभूतः सन् सुकृती त्यक्तकल्मषः |
जीवन्मुक्तः स विज्ञेयो यस्मै लब्धा हि दक्षिणा | |

दशांशं होमयेत्तदनु तर्पयेत् | अथ हैके यज्ञान् कामानद्वैतज्ञानादीननिरुद्धसरस्वतीति | अथ हैषः काळिकामनुजापी यः सदा शुद्धात्मा ज्ञानवैराग्ययुक्तः शांभवीदीक्षासु रक्तः शाक्तासु | यदि वा ब्रह्मचारी रात्रौ नग्नः सर्वदा मधुनाऽशक्तो मनसा जपपूजादिनियमवान् | योषित्प्रियकरो भगोदकेन तर्पणं तेनैव पूजनं कुर्यात् | सर्वदा काळिकारूपमात्मानं विभावयेत् | स सर्वदा योषिदासक्तो भवेत् | स सर्वहत्यां तरति तेन मधुदानेन | अथ पंचमकारेण सर्वमायादिविद्यां पशुधनधान्यं सर्वेशत्वं च कवित्वं च | नान्यः परमः पंथा विद्यते मोक्षाय ज्ञानाय धर्माधर्माय | तत्सर्वं भूतं भव्यं यत्किंचिद्दृश्यमानं स्थावरजंगमं तत्सर्वं काळिकातंत्रे ओतं प्रोतं वेद | य एवं मनुजापी स पाप्मानं तरति | स भ्रूणहत्यां तरति | सोऽगम्यागमनं तरति | स सर्वसुखमाप्नोति | स सर्वं जानाति | स सर्वसंन्यासी भवति | स विरक्तो भवति | स सर्ववेदाध्यायी भवति | स सर्वमंत्रजापी भवति | स सर्वशास्त्रवेत्ता भवति | स सर्वज्ञानकारी भवति | स आवयोर्मित्रभूतो भवति | इत्याह भगवान् शिवः | निर्विकल्पेन मनसा स वंद्यो भवति | |

अथ हैनां |
मूलाधारे स्मरेद्दिव्यं त्रिकोणं तेजसां निधिं |
शिखा आनीय तस्याग्नेरथ तूर्ध्वं व्यवस्थिता ||

नीलतोयदमध्यस्था विद्युल्लेखेव भास्वरा |
नीवारशूकवत्तन्वी पीता भास्वत्यणूपमा ||

तस्याः शिखाया मध्ये परमात्मा व्यवस्थितः |
स ब्रह्मा स शिवः सेंद्रः सोऽक्षरः परमः स्वराट् ||

स एव विष्णुः स प्राणः स कालोऽग्निः स चंद्रमाः |
इति कुंडलिनीं ध्यात्वा सर्वपापैः प्रमुच्यते ||

महापातकेभ्यः पूतो भूत्वा सर्वमंत्रसिद्धिं कृत्वा भैरवो भवेत् | महाकालभैरवोऽस्य ऋषिः | उष्णिक् छंदः काळिका देवता | ह्रीं बीजं ह्रूं शक्तिः क्रीं कीलकं अनिरुद्धसरस्वती देवता | कवित्वे पांडित्यार्थे जपे विनियोगः | इत्येवमृषिच्छंदोदैवतं ज्ञात्वा मंत्र साफल्यमश्नुते | अथर्वविद्यां प्रथममेकं द्वयं त्रयं वा नामद्वयसंपुटितं कृत्वा योजयेत् | गतिस्तस्यास्तीति | नान्यस्य गतिरस्तीति | ॐ सत्यं | ॐ तत्सत् ||

अथ हैनं गुरुं परितोष्यैनं मंत्रराजं गृह्णीयात् | मंत्रराजं गुरुस्तमपि शिष्याय सत्कुलीनाय विद्याभक्ताय सुवेषां स्त्रियं स्पृष्ट्वा स्वयं निशायां निरुपद्रवः परिपूज्य एकाकी शिवगेहे लक्षं तदर्धं वा जपित्वा दद्यात् | ॐ ओं ॐ सत्यं सत्यं सत्यं | नान्यप्रकारेण सिद्धिर्भवति | अथाह वै काळिकामनोस्तारामनोस्त्रिपुरामनोः सर्वदुर्गामनोर्वा स्वरूपसिद्धिरेवमिति शिवं ||

इत्याथर्वणे सौभाग्यकांडे काळिकोपनिषत् समाप्ता |